सावर्णजामदग्न्यप्रणीतं

सङ्गीतौषधसूत्रम्

प्रथमपरिच्छेदः

अथ सङ्गीतौषधजिज्ञासा॥१॥

नादमूलं सङ्गीतम्॥२॥

नित्यो ज्ञानमयो नादः॥३॥

अनित्यो व्यवहार्यः॥४॥

द्वितीयपरिच्छेदः

शब्दप्रत्यक्षे॥१॥

नवधेत्यभिनवगुप्तः॥२॥

स्थूले॥३॥

पश्यन्ती गीतम्॥४॥

मध्यमा वाद्यादिः॥५॥

वैखरी वाक्यस्था॥६॥

सूक्ष्मे॥७॥

गीतादीचिकीर्षा॥८॥

परे॥९॥

गीतादिज्ञानावस्था॥१०॥

तृतीयपरिच्छेदः

सप्त स्वराः॥१॥

द्वाविंशतिश्रुतयः॥२॥

प्रत्नरससम्बधज्ञानान्नूत्नसम्बन्धपरामर्शो विचारहेतुः॥३॥

स्वररससम्बन्धो भारतीयः॥४॥

सकलविकृतास्पर्शादगण्यः॥५॥

श्रुतिजात्या इति नान्यदेवाहोबलौ॥६॥

नवेष्टिः कालपरिच्छिन्नाद् आस्वादभेददर्शनात्॥७॥

गौणः स्वररससम्बन्धः॥८॥

विभावादिनियम्यो रसः॥९॥

चतुर्थपरिच्छेदः

गीतरससूत्रे॥१॥

वीणादिविभावः॥२॥

आलापोदाहरणम्॥३॥

काण्ठ्यं च॥४॥

रागविग्रहोऽन्यथा॥५॥

अनुभावे॥६॥

वाचि स्वरा एव॥७॥

काकुः स्वराधिष्ठिता॥८॥

काकुक्रियाऽङ्गे॥९॥

यन्त्ररागतद्ग्राहवाद्यादिगमकालङ्कारात्मिका॥१०॥

स्तम्भकम्पाश्रुरोमाञ्चाः पञ्चैव सात्त्विकाः॥११॥

निर्वेदग्लानिमदश्रमचिन्तास्मृतिधृतिहर्षजडताविषादनिद्रासुप्तविबोधौग्रतास्नेहभयानि व्यभिचरन्ति॥१२॥

पररसः शान्तात्मा॥१३॥

सत्त्वं सर्वेषु॥१४॥

रजः शृङ्गारवीररौद्रेषु॥१५॥

तमः करुणभयानकबीभत्सेषु॥१६॥

सत्त्वेन पित्तकफयोः॥१७॥

रजसा पित्तवातयोः॥१८॥

तमसा कफस्य॥१९॥

प्रयोगः प्रकृतिप्रयोजनप्रबन्धाधिष्ठितः॥२०॥

प्रकृतिर्मानसिकी॥२१॥

रक्षणप्रशमने प्रयोजने॥२२॥

रक्षणे॥२३॥

काफे सर्वे॥२४॥

पैत्ते सर्वे॥२५॥

वाते राजसाः॥२६॥

अनानुकूल्यमप्रयोगः॥२७॥

प्रशमने॥२८॥

काफे पैत्तम्॥२९॥

पैत्ते काफम्॥३०॥

वाते काफम्॥३१॥

पञ्चमपरिच्छेदः

वाद्या गीतानुगाः॥१॥

गीतरसं पुष्णन्ति॥२॥

षष्ठपरिच्छेदः

शब्दप्रबन्धे रसदृष्टावालङ्कारिकाः प्रमाणानि॥१॥

सप्तमपरिच्छेदः

भावानुगस्वरकल्पनाविचारः॥२॥

काक्वधिष्ठितो भावः॥३॥

॥इति सावर्णजामदग्न्यापरनामकावीरलालगङ्गोपाध्यायप्रणीतं सङ्गीतौषधसूत्रम्॥